दिनाङ्क :- 11.10.2026 प्रात: - 06:55

## अथवार्ताः

### प्रधानमन्त्रिणः चेन्नईयात्रा

प्रधानमन्त्री नरेन्द्रमोदी अद्य तमिलनाडु-राज्यस्य चेन्नईनगरे त्रयोदशसहस्र-कोटिरूप्यकाणां परियोजनानाम् उद्घाटनं करिष्यति। प्रधानमन्त्री चेन्नई-मेट्रो-रेलपरियोजनायाः तस्य खण्डस्य मेट्रोरेलसेवायाः शुभारम्भं करिष्यति, यस्य निर्माणं प्रायः नवचत्वारिंशत्-शतकोटिरूप्यकाणां व्ययेन कृतम्। श्रीमोदी पोरूर-बाइपास-स्थानकात् पूनमल्ली-बाइपास-स्थानकपर्यन्तं पुनश्च तत्रतः चेन्नई-मेट्रोरेलयानेन यात्रामपि करिष्यति। पूनमल्ली-पोरूर-मार्गे उन्नतसङ्केतप्रणालीयुक्ता त्रीणि दशांशं सप्त किलोमीटर्-मिता दीर्घा द्विस्तरीया संरचना अस्ति, या चालकविहीनसञ्चालनाय निर्मिता अस्ति। प्रधानमन्त्री पञ्चाशदधिक-सप्तशत-कोटिरूप्यकेभ्यः अधिकमूल्यानां रेलमार्गाधारभूत-संरचनापरियोजनाः राष्ट्राय समर्पयिष्यति तथा तासाम् उद्घाटनमपि करिष्यति। एतासु अमृतभारत-स्थानकयोजनायाः अन्तर्गतं पुनर्विकसितानि पलनी, वेल्लोर-कैण्टोनमेण्ट्, अम्बासमुद्रम्, परमकुडी, नमक्कल चेत्येतेषु स्थानेषु स्थितानि पञ्च-अमृतस्थानकानि सम्मिलितानि सन्ति। श्रीमोदी पोरूर-सरोवरस्य समीपे स्थिते जलाकण्डेश्वरमन्दिरे दर्शनं पूजनं च करिष्यति।

---

### प्रधानमन्त्रि-धनधान्य-कृषियोजना

प्रधानमन्त्रि-धनधान्य-कृषियोजनायाः अद्य एकं वर्षं पूर्णम्। इयं योजना विगतवर्षे अस्मिन्नेव दिने देशस्य शत-आकाङ्क्षि-कृषिजनपदेषु कृषेः सुदृढीकरणाय प्रारब्धा आसीत्। अस्माकं वार्ताहरानुसारम्, अस्याः योजनायाः अन्तर्गतम् एकादशमन्त्रालयानां विभागानां च षट्त्रिंशत्-केन्द्रीययोजनाः राज्यप्रशासनानां योजनाभिः निजक्षेत्रस्य सहभागितया च समन्विताः सन्ति। अस्याः योजनायाः उद्देश्यं प्रत्येकस्य जनपदस्य विशिष्टानां कृषिसम्बद्धानाम् आवश्यकतानां पूर्तिः अस्ति।

---

## राजनाथसिंहस्य व्याख्यानम्

रक्षामन्त्री राजनाथसिंहः युवकेभ्यः नीतिनिर्माणसमये तेषाम् आकाङ्क्षाः, आवश्यकताः तथा परिवर्तनशीलाः परिस्थितयः विचारणीया इति आवश्यकतायां बलं दत्तवान्।

नवदिल्ल्याम् आयोजिते नरेन्द्रमोहनव्याख्याने सम्बोधनं कुर्वन् श्रीसिंहः उक्तवान् यत् समयस्य परिवर्तनशीलानाम् आवश्यकतानाम् अनुरूपं प्रशासनम् अधुना 'युवकेभ्यः नीतिः' इति अवधारणायाः परं गत्वा 'युवजनैः निर्मिता नीतिः' तथा 'युवजनैः सह निर्मिता नीतिः' इत्येतयोः दिशयोः अग्रे सरति। सः उक्तवान् यत् लोकतन्त्रे मतभेदस्य प्रकटीकरणं प्रत्येकस्य व्यक्तेः अधिकारः अस्ति, किन्तु अराजकतायाः प्रसारणं न स्वीकरणीयम्।

---

## उत्तररेलमार्गः - रेलयानानां सञ्चालनम्

उत्तररेलमार्गेण घोषितं यत् अद्य सर्वाणि रेलयानानि स्वसामान्यसमयसारिण्यनुसारं प्रचलिष्यन्ति। रेलविभागेन ह्यः प्रातः चतुर्वादनात् अपराह्णे द्विवादनपर्यन्तं नईदिल्ली-हजरतनिजामुद्दीन-रेलस्थानकयोः आगन्तव्यानि मेल्-एक्सप्रेस्-रेलयानानि निरस्तानि कर्तुं निर्णयः गृहीतः आसीत्। अद्य रेलसेवाः सामान्यसमयसारिण्यनुसारं सञ्चालिताः भविष्यन्ति।

---

## गुजरातः - नवरात्रिमहोत्सवः

विश्वस्य दीर्घतमेषु नृत्योत्सवेषु अन्यतमः नवरात्रमहोत्सवः अद्य गुजरातराज्ये महता उत्साहेन भक्तिभावेन च प्रारभते। नवदिनात्मकः अयं महोत्सवः दुर्गादेव्याः नवानां स्वरूपाणाम् आराधनायै समर्पितः अस्ति। शारदीयनवरात्रस्य प्रथमदिने अनेके श्रद्धालवः गुजरातस्य प्रसिद्धेषु देवीमन्दिरेषु दर्शनार्थं गच्छन्ति। महोत्सवकाले सुरक्षां सुनिश्चेतुं गुजरात-आरक्षिदलेन राज्यस्य द्वाविंशतिसहस्राधिकेषु गरबास्थलेषु व्यापकाः सुरक्षाव्यवस्थाः कृताः सन्ति। महिलानां सुरक्षायै उत्सवस्थलेषु सार्वजनिकेषु गरबानृत्यस्थलेषु च विशेषाणि 'शी-टीम्' इति दलानि तथा अनेके आरक्षकाः नियोजिताः सन्ति।

-----------------------------------------------------

## क्रिकेट्

पुरुष-क्रिकेट्क्रीडायां भारतम् अद्य इन्दौरनगरे स्थिते होल्कर-क्रीडाङ्गणे तृतीयायां विंशति-प्रतिविंशति-अन्ताराष्ट्रिय-प्रतिस्पर्धायां वेस्टइण्डीज्दलं सम्मुखीकरिष्यति। इयं स्पर्धा सायं सप्तवादने आरप्स्यते।

राँचीनगरे आयोजितायां द्वितीयायां विंशति-प्रतिविंशति-स्पर्धायां वेस्टइण्डीज्दलेन भारतं षड्भिः स्तोभैः पराजितम्। अनेन पञ्चस्पर्धात्मिकायां शृङ्खलायां उभे दले एकम् एकम् इति समस्थितिं प्राप्तवतः।

।। इति वार्ता:।।